## सुः पूजायाम् । (९४/५५५)

सुशब्दः पूजायामर्थे कर्मप्रवचनीयसञ्ज्ञो भवति । सु सिक्तं भवता । सु स्तुतं भवता[1] । धात्वर्थः स्तूयते । उपसर्गसञ्ज्ञाश्रयं षत्वं न भवति । पूजायाम् इति किम् ? सुषिक्तं किं तवात्र ॥

## अतिरतिक्रमणे च । (९५/५५६)

अतिशब्दः अतिक्रमणे, [2]चकारात् पूजायां च कर्मप्रवचनीयसञ्ज्ञो भवति । निष्पन्नेऽपि [3]वस्तुनि [4]क्रिया-प्रवृत्तिः अतिक्रमणम् । अति सिक्तमेव भवता । [5]अति स्तुतमेव भवता । पूजायाम्--अति सिक्तं भवता । अति स्तुतमेव भवता । शोभनं कृतमित्यर्थः ॥

## अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु । (९६/५५७)

पदार्थे, सम्भावने, अन्ववसर्गे, गर्हायाम्, समुच्चये [6]च वर्तमानः [7]अपिः कर्मप्रवचनीयसञ्ज्ञो भवति । [8]पदान्तरस्याप्रयुज्यमानस्यार्थः पदार्थः--सर्पिषोऽपि स्यात् । मधुनोऽपि स्यात् । मात्रा, बिन्दुः, [9]स्तोकम् इत्य-स्यार्थेऽपिशब्दो वर्तते । सम्भावनम् अधिकार्थवचनेन [10]शक्तेरप्रतिघाताविष्करणम् – अपि सिञ्चेन् [11]मूलकसहस्रम् । अपि स्तुयाद् राजानम् । अन्ववसर्गः कामचाराभ्यनुज्ञानम्–अपि सिञ्च । अपि स्तुहि । गर्हा निन्दा–धिग् जाल्मं देवदत्तम्, अपि सिञ्चेत् पलाण्डुम् (नि. १.४.१२) । अपि स्तुयाद् वृषलम् । समुच्चये--अपि सिञ्च । अपि स्तुहि । सिञ्च च स्तुहि च । उपसर्गसञ्ज्ञाबाधनात् षत्वं न भवति ॥

## अधिरीश्वरे । (९७/६४४)

ईश्वरः स्वामी, स च स्वमपेक्षते । तदयं स्वस्वामिसम्बन्धे [12]अधिः कर्मप्रवचनीयसञ्ज्ञो भवति । तत्र कदाचित् स्वामिनः कर्मप्रवचनीयविभक्तिः सप्तमी भवति, कदाचित् [13]स्वात् । अधि ब्रह्मदत्ते [14]पञ्चालाः । अधि [15]पञ्चालेषु ब्रह्मदत्तः[16] ॥

## विभाषा कृञि । (९८/६४६)

अधिः करोतौ विभाषा[17] कर्मप्रवचनीयसञ्ज्ञो भवति । यदत्र [18]मामधि करिष्यति । कर्मप्रवचनीयसञ्ज्ञा-पक्षे गतिसञ्ज्ञा[19]बाधनात् 'तिङि चोदात्तवति' (८.१.७१/३९७८) इति [20]निघातो न भवति ॥

---

1. शोभनं कृतं इत्यधिकम् फ. शोभनं कृत्यं इत्यर्थः इत्यधिकम् ह. 2. चकारात् नास्ति क. 3. फले क. ड. फ.ह. 4. क्रियावृत्तिः ड, क्रियायाः प्रवृत्तिः ह. 5. उदाहरणमिदं नास्ति फ. 6. च नास्ति ब.क.ह. 7. अपिशब्दः क.फ. 8. वाक्यमिदं नास्ति ह. 9. अल्पम् क. 10. शक्तौ फ. 11. मूलसहस्रम् अ. 12. अधिः नास्ति ब.ड.ग. 13. स्व-स्य फ. ह, स्यात् इत्यधिकम् अ. 14. पाञ्चालाः क. 15. पाञ्चालेषु क. 16. इति इत्यधिकम् क. ड. 17. ईश्वरे इत्यधिकम् फ. ह. 18. ममाधि क. 19. विधानात् ब. ड. 20. गति इत्यधिकम् ह.